दिनाङ्क :- 10.05.2025 प्रात: - 06:55

## अथ वार्ता:

### पाकिस्तानक्रमणम्

अन्ताराष्ट्रियसीम्नि पाकिस्तानसम्बद्धायां नियन्त्रणरेखायां च बारामूलात: भुजपर्यन्तं षड्विंशति स्थानेषु ड्रोन इत्योपकरणानि दृष्टानि। एतेषु नागरिकेभ्य: सैन्यस्थानेकभ्य: च सम्भाव्यसङ्कटोत्पद्यमानानि शङ्कायुतानि ड्रोनइत्योपकरणानि सम्मिलितानि सन्ति। रक्षासूत्रानुसारं एतेषु स्थानेषु बारामुल्ला-श्रीनगर-अवन्तीपुरा-नगरोटा-जम्मू-फिरोजपुर-पठानकोट-फाजिल्का-लालगढजट्टा-जैसलमेर-बाड़मेर-भुज-लखीनाला-क्षेत्राणि सम्मिलितानि वर्तन्ते। अत्रावधौ भारतीयशस्त्रबलै: उच्चस्तरीया सतर्कता निर्मीयते। तथा च वायवीयसङ्कट: काउन्टर-ड्रोन-सिस्टम इत्येतस्या: प्रणाल्या: उपयोगं कृत्वा निरन्तरं निरीक्ष्यते। एतदतिरिच्य यत्र कुत्रपि आवश्यकता वर्तते तत्र त्वरितविधिना कार्याचरणमपि विधीयते। स्थानीयाधिकारिभि: सीमवर्तिषु क्षेत्रेषु निवसतां जनानां कृते कठोर: सुरक्षा- सम्बद्ध: दिङ्निर्देश: प्रख्यापित: यत्तै: अनावश्यकरूपेण आवागमनं सीमितं करणीयम् तथा च गृहैव स्थातव्य:। अत्रोक्तं यत् व्याकुलताया: आवश्यकता नैव वर्तते अपि च सतर्कता पूर्वोपाया: च नागरिकै: करणीया:। अस्माकं वार्ताहर: सूचितवान् यत् पञ्जाबराज्यस्य फिरोजपुर-अमृतसर-पठानकोट-जनपदान् समेत्य समीपवर्तिषु जनपदेषु आक्रमणस्य प्रयास: विहित: ड्रोन इत्योपकरणै:। परञ्च भारतीय-रक्षा-बलै: सफलतापूर्वकं एते प्रयासा: विफलीकृता:। अत्रावधौ फिरोजपुरे एकं गृहं क्षतिग्रस्तं जातम् अथ च आक्रमणस्य कारणेन परिवारस्य एकस्य त्रय: सदस्या: व्रणिता: जाता: ते च सर्वकारीयचिकित्सालये उपचाररता: वर्तन्ते सूच्यते च यत् ते सुरक्षिता: सन्तीति। फिरोजपुरस्य आरक्षिप्रमुखस्य भूपिन्दर सिंह-सिद्धू इत्यस्य अनुसारम् एषा घटना भिन्नासीत् यस्य सामुख्यं प्रभाविविधिना सेनाद्वारा कृतम्।

### विदेशमन्त्रालय-वार्ता:

पाकिस्तान-देशः गुरुवासरे रात्रौ लेहतः सरक्रीक-पर्यन्तं षट्त्रिंशत् स्थानेषु प्रायः चतुश्शतं ड्रोन उपकरणानि उपयुज्य अन्तः प्रवेष्टुं प्रायतत। भारतीय-सशस्त्र-सैनिकाः गतिजागतिविधिं उपयुज्य तानि ड्रोन उपकरणानि नष्टी कृतवन्त:। नवदिल्ल्यां विशेषसूचनात्मक-सत्रे, भारतीयसेनायाः कर्नल् पदारूढा सोफिया कुरैशी इत्येषा अकथयत् यत् पाकिस्तानीसेना सम्पूर्ण-पश्चिमसीमाया: सैन्यसंरचनायां आक्रमणं कर्तुं भारतीयवायुक्षेत्रस्य अनेकवारं उल्लङ्घनं कृतवती इति। असौ अवदत् यत् ते नियन्त्रणरेखायां बृहत्-क्षमतायुतानि शस्त्राणि अपि प्रक्षेपितवन्त:। अनया निगदितम् यत् वायवीय-आक्रमणानां उद्देश्यं वायु-रक्षा-प्रणाल्याः परीक्षणम्, गुप्तसूचनासङ्ग्रहणम् च आसीत्। एतदतिरिच्य, प्राप्तानां ड्रोन्स्-अवशेषानां फोरेन्सिक् इति अन्वेषणं प्रचलति तथा च प्रारम्भिकानि प्रतिवेदनानि सूचयन्ति यत् तानि तुर्की-ड्रोन्स्-असिस्गार्ड-सोङ्गर् इति सम्बद्धानि सन्ति।

विदेशसचिवः विक्रममिस्री इत्ययम् गुरुद्वाराणां, मठाणां, मन्दिराणां इत्यादीनां पूजास्थलानाम् आक्रमणं विस्फोटनं च कर्तुं पाकिस्तानस्य निन्दाम् अकरोत्, तत् पाकिस्तानस्य कृते क्रूरतायाः नूतनं स्तरम् इति उक्तवान्।

**भारतीय-विमानपत्तन-प्राधिकरणेन**

भारतीय-विमानपत्तन-प्राधिकरणेन अस्य मासस्य चतुर्दश दिनाङ्कपर्यन्तं भारतस्य उत्तर-पश्चिमयोः द्वात्रिंशत् विमानस्थानकानि नागरिक-विमान-परिचालनार्थम् अस्थायीरूपेण निरुद्धानि इति घोषितम्। प्रभावितेषु विमानस्थानकेषु अमृतसर-चण्डीगढ-जम्मू-श्रीनगर-भुज-जामनगर-जैसलमेर-पठानकोट-इत्यादीनि महत्त्वपूर्णानि स्थानानि सन्ति। एतदतिरिच्य, दिल्ली-मुम्बई-नगरयोः वायु-सूचना-क्षेत्रेषु विद्यमानाः वायु-यातायात-सेवायाः मार्गाणां पञ्चविंशति ट्राम्-यानानि अपि अस्मिन् काले निरुद्धानि भविष्यन्ति।

**अन्ताराष्ट्रिय-मुद्राकोषः**

भारतः पाकिस्तानस्य विषये आई.एम्.एफ्. कार्यक्रमाणां प्रभावशीलतायाः विषयेऽपि चिन्तां प्रकटितवान्, तस्य ऐतिहासिक-न्यूनतायाः दृष्ट्या, ऋण-वित्तपोषणस्य निधिं राज्येन प्रायोजितस्य सीमापारस्य आतङ्कवादस्य कृते उपयोक्तुं शक्यते इति सम्भावनायाः विषये च।

।। इति वार्ताः।।